दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् पौषशुक्लचतुर्थी
पौषः ०९ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-62 | 1 | दिसम्बर 24, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 निर्वाचनायोगेन विशेष-गहन-पुनरीक्षण-अभियानस्य अनन्तरं मध्य-प्रदेशस्य कृते मतदातृ-सूच्याः प्रारूपम् प्रकाशितम्

3 PMGSY: चतुर्थे चरणे २१४ ग्रामाः सम्पर्कमार्गेण सम्बद्धाः भविष्यन्ति, लोकनिर्माणविभागेन केन्द्रसर्वकाराय प्रस्तावः प्रेषितः

5 एनटीपीसी बाल-भारती विद्यालये "वार्षिकोत्सवः 'आगाज़ 1.0 भारतम्—विरासतं वैभवं च' "


## भारतस्य उपराष्ट्रपतिःसी.पी. राधाकृष्णन् इत्यसौ पूर्वप्रधानमन्त्रिणः चौधरी-चरण-सिंहस्य जयन्त्यवसरे श्रद्धाञ्जलिं समर्पितवान्



**हिमसंस्कृतवार्ताः** - भारतस्य उपराष्ट्रपतिः सी.पी. राधाकृष्णन् इत्यसौ पूर्वप्रधानमन्त्रिणः चौधरी-चरण-सिंहस्य जयन्त्यवसरे श्रद्धाञ्जलिं समर्पितवान्। सामाजिक सञ्जालीयतन्त्रे श्री राधाकृष्णन-वर्यः अवदत् यत् पूर्वप्रधानमन्त्री महान् नेता आसीत्, कृषिकल्याणस्य प्रबलः समर्थकः च आसीत्। उपराष्ट्रपतिः एतदपि अकथयत् यत् ग्रामीण विकासाय सामाजिक-न्यायाय कृषकाणां सशक्तीकरणाय च तस्य अविचल-प्रतिबद्धता भारतस्य सार्वजनिक-जीवने अमूल्यं योगदानम् आसीत् ।

## अन्ताराष्ट्रिय-नागरिक-विमानन-सङ्घटन-परिषदि भारतं सर्वाधिकैः मतैः पुनः चितम्

**हिमसंस्कृतवार्ताः** - नागरिक-विमानन-मन्त्रिणा श्री राममोहन-नायडुना प्रोक्तं यत् अन्ताराष्ट्रिय-नागरिक-विमानन-सङ्घटनस्य परिषदि भारतं सर्वाधिकैः मतैः पुनः चितम्। सामाजिक सञ्जालीयतन्त्रे मन्त्रिणा कथितं यत् प्रधानमन्त्रिणः श्री नरेन्द्रमोदिनः नेतृत्वे भारतीय-विमानयान-क्षेत्रस्य महती प्रसिद्धिः सम्पूर्ण विश्वे जायते। श्री नायडुः अवदत् यत् सः अन्ताराष्ट्रिय-नागरिक-विमानयान-सङ्घटनस्य "नो कन्ट्री-लेफ्ट-विहाइण्ड् इनिशियेटिव्" इत्यस्मिन् प्रकल्पे भारतस्य समर्थनं समीक्षितवान्। अपि च तत्र भारतं महत्त्वपूर्ण सहभागी-रूपेण उपस्थाय, विकासशील-देशेभ्यः साहाय्यं प्रददाति, सहैव अन्ताराष्ट्रिय-नागरिक-विमानयान-सङ्घटनस्य मानकानां अनुशंसिताभ्यासं च प्रोत्साहयति

## राष्ट्रपतिः द्रौपदीमुर्मुः नवदेहल्यां राष्ट्रपति-भवने समनुष्ठिते समारोहे ऐषमो राष्ट्रिय-विज्ञान-पुरस्कारान् व्यतरत्



**हिमसंस्कृतवार्ताः** - राष्ट्रपतिः द्रौपदी मुर्मुः नवदेहल्यां राष्ट्रपति-भवने समनुष्ठिते समारोहे ऐषमो राष्ट्रिय-विज्ञान-पुरस्कारान् व्यतरत् । एषः पुरस्कारः विज्ञाने, प्रौद्योगिक्यां, नवाचार-क्षेत्रे च असाधारण-योगदानार्थं देशस्य सर्वोच्च सम्मानः मन्यते। एतस्मिन् वर्षे एते पुरस्काराः श्रेणी-चतुष्टये प्रदत्ताः सन्ति तद्यथा - विज्ञान-रत्नम्, विज्ञान-श्री, विज्ञान-युवा-शान्ति स्वरूप-भटनागरः विज्ञान-दल-पुरस्कारश्चेति। प्रख्यात खगोल वैज्ञानिकः पद्म-विभूषणेन सम्मानितः प्रोफेसर जयन्त-विष्णु-नार्लीकरः मरणात् परं विज्ञान रत्न पुरस्कारेण सम्मानितः। एतद् अतिरिच्य अष्ट वैज्ञानिकाः विज्ञान श्रीः इति सम्मानेन सम्मानिताः सन्ति। चतुर्दश युवावैज्ञानिकाश्च विज्ञान-युवा-पुरस्कार-भाजनीभूताः। अथ च सी.एस.आई.आर. इति दलस्य अरोमा अभियानम् विज्ञान-दल-पुरस्कारेण पुरस्कृतम्। राष्ट्रपतिः प्रावोचत् यत् एतादृशाः पुरस्काराः देशे वैज्ञानिक चिन्तनस्य नवाचारस्य च प्रेरणाप्रदाने आवश्यकाः सन्ति।

## नव-देहलीस्थे बांग्लादेश-उच्चायोगस्य बहिः भूरि-सङ्घटनैः अल्पसंख्यकेषु अत्याचार-विषये, तथा सम्मर्दद्वारा दीपू-चन्द्र-दासस्य हत्यायाः विरोधे प्रदर्शनम् आचरितम्



**हिमसंस्कृतवार्ताः** - विश्वहिन्दुपरिषद् बजरङ्गदलं चेत्यादयः अनेकाः संस्थाः नवदेहल्यां बाङ्ग्लादेश-उच्चायोगस्य बहिः बाङ्ग्लादेशे अल्पसङ्ख्यक-हिन्दूनाम् उपरि कृतानां अत्याचाराणां, दीपुचन्द्र-दासस्य हत्यायाश्च विरोधे विरोध-प्रदर्शनं कृतवन्तः। उच्चायोगस्य बहिः सुरक्षा-व्यवस्था वर्धिता अस्ति, तथा च क्षेत्रं आरक्षकाणां अर्धसैनिक बलानां च नियुक्त्या सह त्रिस्तरीय-अवरोधनेन सुरक्षितं कृतम् अस्ति। एतदतिरिच्य, विदेशमन्त्रालयः अवदत् यत् भारतं बाङ्ग्लादेशस्य परिवर्तितां स्थितिं निशितदृष्ट्या निरीक्षते। भारतीय-उच्च-आयोगस्य अधिकारिणः बाङ्ग्लादेशस्य अधिकारिभिः सह सम्पर्के सन्ति, अल्पसङ्ख्यकानाम् उपरि आक्रमणानां विषये गभीरां चिन्तां च प्रकटयन्ति ।

## भारत-न्यूज़ीलैण्ड्-मुक्तव्यापार-सन्धिज्ञापनपत्रम् प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना ऐतिहासिक-सोपानत्वेन प्रशंसितम् - पीयूष गोयलः



**हिमसंस्कृतवार्ताः** - वाणिज्योद्योग-मन्त्रिणा पीयूष गोयलेन विहितम् भारत-न्यूज़ीलैण्ड्-मुक्तव्यापार-सन्धिज्ञापनपत्रम् प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना ऐतिहासिक-सोपानत्वेन प्रशंसितम्। एतत् भारतस्य प्रथमं महिला नेतृत्वे सम्पन्नं मुक्तव्यापार-सन्धिज्ञापनपत्रम् अस्ति, ध्यानास्पदमस्ति यदस्यां वार्ताप्रक्रियायां महिलाः एव मुख्यभूमिकां निर्व्यूढवत्यः । प्रधानमन्त्रिणापि अभिहितं यत् अद्यत्वे भारतस्य मुक्तव्यापार-सन्धिज्ञापनपत्राणि केवलं शुल्क-न्यूनीकरणे एव सीमितानि न सन्ति, अपि तु अर्थव्यवस्थायाः सुदृढीकरणाय, कोटिशः जनानां जीवन-स्तरस्य परिष्काराय च बृहत्तरस्य अभियानस्य अभिन्नभागाः वर्तन्ते ।

## एआइ विद्यालयस्य महाविद्यालयस्य च पाठ्यक्रमस्य अभिन्नः भागः स्यात् : उपराष्ट्रपतिः सी.पी. राधाकृष्णन्

उपराष्ट्रपतिः सी.पी. राधाकृष्णन् उक्तवान् यत् भारतं सर्वतोमुखविकासाय राष्ट्रियपरिवर्तनार्थं च कृत्रिमबुद्धिसम्बद्धाः नीतयः परियोजनानि च निर्मातुं वैश्विकरूपेण सर्वाधिकसक्रियदेशेषु अन्यतमः अस्ति। उपराष्ट्रपतिः एतत् वक्तव्यं नवीदिल्लीनगरे आयोजिते एआइ विकासविषये राष्ट्रियसम्मेलनं सम्बोधयन् अवदत्।

## सुभाषितम्

**एकया द्वे विनिश्चित्य,**
**त्रींश्चतुर्भिर्वशे कुरु।**
**पञ्च जित्वा विदित्वा,**
**षट्सप्त हित्वा सुखी भव।।**

**महासुभाषितसंग्रहः**

अर्थात्- यदि तुम्हारे अनेक विरोधी और प्रतिद्वन्दी हों तो उनमें से एक या दो प्रतिद्वन्दियों से समझौता कर लो, तीसरे और चौथे को अपने वश मे कर लो, पांचवे पर विजय प्राप्त कर और यह सब सुनिश्चित कर छठवें और सातवें की उपेक्षा कर उन्हें अलग थलग कर सुखी और निश्चिन्त हो जाओ।


दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## भारतं, चक्रवातेन प्रभाविताय श्रीलङ्का-देशाय पुनर्निर्माणार्थं सार्धचतुः शतं मिलियन-डॉलर-मूल्यात्मकं सहायता-पुटकम् प्रदास्यति।

**हिमसंस्कृतवार्ताः** - भारतं श्रीलंकादेशस्य कृते सार्धचतुः शतं मिलियन डॉलर-मूल्यात्मकं सहायता-पुटकं, चक्रवात-प्रभावित-क्षेत्राणां पुनर्निर्माण-हेतुः प्रदास्यति। डिटवाह इत्याख्येन चक्रवातेन प्रभावित-श्रीलंकायाः सहयोगार्थं भारतेन एषा पुनर्निर्माण-सहयोग-घोषणा कृतास्ति। कोलंबो नगरे सञ्चार माध्यमानि संबोधयन् विदेश-मन्त्री डॉ. एस. जयशंकरः प्रत्यपादयत् यत् एतस्मिन् साहाय्य-पुटके सार्ध-त्रि-शत-मिलियन डॉलर-मूल्यात्मिका शैथिल्यीकृता ऋण-सहायता अस्ति चेत् शत-मिलियन डॉलर-मूल्यात्मकः अनुदान राशिः वर्तते।

# हिमाचलपंचायतनिर्वाचनानां मध्ये ७ नवीनपञ्चायतानां सङ्घटनम्, ७६ पंचायतानां च भविष्यति पुनर्सङ्घटनम्




**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशे पंचायतनिर्वाचनस्य विषये सर्वकारस्य राज्यनिर्वाचन-आयोगस्य च मध्ये प्रचलतः द्वन्द्वस्य मध्ये पंचायतीराजविभागेन सप्तनवीनपञ्चायतानां निर्माणार्थं कुलम् ७४ पंचायतानां पुनर्सङ्घटनार्थं च अधिसूचना प्रकाशिता अस्ति। प्रभावितनिवासिभ्यः २७ दिसम्बर यावत् आक्षेपाः याचिताः सन्ति। समाचारानुसारं नूतनानां पंचायतानां निर्माणं पुनर्सङ्घटनं च अन्येषु केषुचित् पंचायतेषु अपि भवितुम् अर्हति।

## आचारसंहितायां गृहीतः निर्णयः

नवीनपंचायतानां निर्माणार्थं पंचायतानां पुनर्सङ्घटनार्थं च अधिसूचना तस्मिन् समये कृता अस्ति यदा सर्वकारेण आपदाप्रबन्धनविधानम् कार्यान्वितं कृत्वा राज्यनिर्वाचन-आयोगेन आदर्श आचारसंहितायां धारा १२.१ कार्यान्विता, पंचायतानां नगरीयस्थानीयनिकायानां च सीमासु किमपि परिवर्तनं प्रतिषिद्धं कृतम् अस्ति।

## उच्चन्यायालये निर्वाचनप्रकरणं लम्बितम्

पंचायतनिर्वाचनसमये संचालनसम्बद्धः विषयः राज्योच्चन्यायालये लम्बितः अस्ति, तस्य श्रवणं ३० दिसम्बर् दिनाङ्के भविष्यति। परन्तु न्यायालयेन किमपि स्थगनं न कृतम्।

## एतेषां सप्त-नूतनपंचायतानां सङ्घटनम्

सप्तनूतनपंचायतानां सङ्घटनार्थं अधिसूचनायां सोलनमण्डलस्य धर्मपुरविकासखण्डे अम्बोटा, कामली, धार की बेड, खेड़ा उपरला, रत्योड, चुहूवाल इति षट् नवीनपंचायतानां निर्माणं, ऊनामण्डलस्य हरोली विकासखण्डे पण्डोगा निम्नपञ्चायतस्य निर्माणं च अन्तर्भवति। एतेन १४ पंचायतानां पुनर्सङ्घटनं भविष्यति।

## एतेषु जनपदेषु ६२ पंचायतानां पुनर्सङ्घटनं भविष्यति

एकस्मात् पंचायतात् अन्यस्मिन् ग्रामस्य स्थानान्तरणात् ६२ पंचायतानां पुनर्सङ्घटनार्थं अधिसूचना कृता अस्ति। एतेषु काङ्गड़ायां १४, सोलने १४, हमीरपुरे १२, मण्ड्यां ८, शिमलायां ६, ऊनायां ४, बिलासपुरे कुल्लौ च द्वौ-द्वौ पंचायतानां पुनर्सङ्घटनार्थं आक्षेपाः याचिताः सन्ति।

# निर्वाचनायोगेन विशेष-गहन-पुनरीक्षण-अभियानस्य अनन्तरं मध्य-प्रदेशस्य कृते मतदातृ-सूच्याः प्रारूपम् प्रकाशितम्



**हिमसंस्कृतवार्ताः -** निर्वाचनायोगेन विशेष-गहन-पुनरीक्षण-अभियानस्य अन्तर्गतं मध्य-प्रदेशस्य कृते अपि प्रारूप-मतदातृ-सूची प्रख्यापिता। आपत्तयः जनवरी द्वाविंशीं यावत् अभियाचिताः सन्ति। ध्येयमस्ति यत् निर्वाचनायोगेन सार्धेक-मास-पर्यन्तं गृहे गृहे विशेष-गहन-पुनरीक्षण-अभियानस्य अनन्तरं मध्यप्रदेशस्य प्रारूप मतदातृ-सूची प्रख्यापिता अस्ति। एषा सूची राज्यस्य सर्वेभ्यः त्रिंशदुत्तर-द्वि-शत-मितेभ्यः विधानसभासनेभ्यः प्रकाशिता अस्ति। सर्वेषु मतदान केन्द्रेषु च उपलब्धास्ति। अस्यां प्रक्रियायां मृतकानां, स्थानान्तरितानां, अनुपस्थितानां मुधा मतदातृनां जनानां च नामानि अपाकृतानि सन्ति। येषां विद्यमानानां मतदातृणां नामानि सूच्यां नैव समाविष्टानि, ते आवश्यक-प्रपत्रैः साकं जनवरी द्वाविंशीं यावत् आपत्तिं पञ्जीकर्तुम् अर्हन्ति । अंतिम- मतदातृ-सूची आगामि-वर्षस्य फरवरी एकविंशीं यावत् प्रख्यापयिष्यते । युगपदेव, केरलस्य, छत्तीसगढ़स्य अंडमान-निकोबारस्य च प्रारूप-सूचिकाः अपि प्रकाशिता । पश्चिम बंगाले निर्वाचनायोगेन विशेष-गहन-पुनरीक्षण-अभियानस्य अनन्तरं अपञ्जीकृत-मतदातृणां वाद-श्रवणस्य प्रथमः चरणः शनिवासरात् प्रभृति आरप्स्यते। एतदन्तर्गतं प्रायः द्वात्रिंशल्लक्ष-मिताः जनाः समावेक्ष्यन्ते। एतस्मिन् चरणे प्रायः द्वात्रिंशत्-लक्ष-मिताः तादृशाः मतदातारः समाविष्टाः भविष्यन्ति, येषां नामानि द्व्युत्तर-द्वि-सहस्र-तम-वर्षस्य मतदातृ-सूच्यां नैव समाविष्टानि आसन् । मुख्य-निर्वाचनाधिकारि-कार्यालयस्य अनुसारेण अस्मिन् सन्दर्भे अधुना यावत् दश-लक्ष-मितेभ्यः मतदातृभ्यः सूचनाः प्रेषिताः सन्ति, तत्रैव विंशति-लक्ष-मिताः अतिरिक्ताः सूचनाः अद्य प्रभृति प्रेष्यन्ते। गणना-चरणस्य अवसरे समस्ते राज्ये आहत्य अष्ट-षष्टि-सहस्राधिक-एक-त्रिंशत्-लक्ष-मिताः अपञ्जीकृताः मतदातारः चिह्नीकृताः आसन्। एतस्याः प्रक्रियायाः उद्देश्यः योग्य मतदातृ-जनानां सूच्यां समावेशः वर्तते। सहैव निर्वाचन-प्रक्रियायाम् अधिक पारदर्शितायाः प्रवर्तनं वर्तते।

# मुख्यमंत्री सुक्खुः आईजीएमसी इत्यत्र घटितायाः घटनायाः अन्वेषणं २४ दिसम्बर् यावत् सम्पन्नं कृत्वा कार्यविधिं कर्तुं निर्दिष्टवान्



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः स्वास्थ्यविभागस्य, शिमलानगरस्य इन्दिरागान्धी चिकित्सामहाविद्यालयस्य, चिकित्साशिक्षानिदेशालयस्य च वरिष्ठाधिकारिभिः सह गोष्ठीं कृतवान्। सभायां राज्ये चिकित्साशिक्षासम्बद्धाः विविधाः विषयाः, 22 दिसम्बर दिनाङ्के शिमलानगरस्य IGMC इत्यत्र घटितायाः घटनायाः विषये च चर्चा अभवत्। मुख्यमन्त्री स्वास्थ्यविभागस्य, आईजीएमसी, चिकित्साशिक्षानिदेशालयस्य च अधिकारिभ्यः घटनासम्बद्धानां सर्वेषां तथ्यानां विषये विस्तृतां सूचनां याचितवान्। मुख्यमन्त्री सुक्खुः निर्देशं दत्तवान् यत् अस्याः घटनायाः अन्वेषणं २०२५ तमस्य वर्षस्य डिसेम्बर्-मासस्य २४ दिनाङ्कपर्यन्तं सम्पन्नं भवतु, शीघ्रमेव समुचितकार्यविधिः करणीया। प्रत्येकं संस्थायां व्यावसायिकानां व्यवहारः शिष्टः शान्तः च भवेत् इति सः बोधितवान्। एतेन न केवलं तेषां व्यक्तित्वं अपि तु संस्थायाः प्रतिबिम्बमपि प्रतिबिम्बितम् अस्ति।मुख्यमन्त्री उक्तवान् यत् ये वैद्याः आईजीएमसी-संस्थायां अध्ययनं कृतवन्तः ते राज्याय आन्तरिक- अन्ताराष्ट्रीय- स्तरयोः गौरवम् आनयन्ति। आईजीएमसी इत्यत्र घटिता घटना निन्दनीया अस्ति। अनुशासनं कस्यापि संस्थायां न सह्यते। मुख्यमंत्री चिकित्साशिक्षानिदेशालयाय चिकित्सामहाविद्यालयेषु अध्ययनं कुर्वतां वैद्यानां वरिष्ठनिवासं प्राप्तुं प्रेरणप्रशिक्षणं दातुं अपि निर्देशं दत्तवान्। सः वरिष्ठनिवासप्रक्रियायाः विषये विस्तृतसूचनाः गृहीत्वा आवश्यकमार्गदर्शिकाः प्रदत्तवान्।

मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारेण विगतत्रिषु वर्षेषु चिकित्साशिक्षाक्षेत्रे अनेकाः महत्त्वाकांक्षिणः उपक्रमाः कृताः। संस्थासु, चिकित्सालयेषु च वैद्यानाम्, सहायक- चिकित्साकर्मचारिणां च कृते उत्तमं वातावरणं प्रदातुं विश्वस्तरीयाः मानकाः स्वीक्रियन्ते। मुख्यमंत्री सुक्खुः अवदत् यत् राज्यसर्वकारः न केवलं स्वास्थ्यक्षेत्रं सुदृढं करोति अपितु अस्मिन् क्षेत्रे आदर्शराज्यं भवितुं कार्यं कुर्वन् अस्ति। सः अवदत् यत् राज्यसर्वकारेण आधुनिकस्वास्थ्यसेवानाम् उपलब्धतायै राज्ये स्वास्थ्यसंरचनानां विकासाय विस्ताराय च ३००० कोटिरूप्यकाधिकं व्ययस्य निर्णयः कृतः। सः अपि अवदत् यत् राज्यसर्वकारः दशकद्वयं यावत् स्वास्थ्यसंस्थासु प्रयुक्तानि पुरातनानि चिकित्सासाधनानां स्थाने नूतनानि अत्याधुनिकानि च उपकरणानि स्थापयति।

# नागरिकेभ्यः सुरक्षां प्रदातुं देशस्य एकतां अखण्डतां च सुनिश्चितुं आईबी महत्त्वपूर्णां भूमिकां निर्वहति- राष्ट्रपतिः द्रौपदीमुर्मूः



**हिमसंस्कृतवार्ताः -** राष्ट्रपतिः द्रौपदी मुर्मु-वर्या इंटेलिजेंस ब्यूरो इति संस्थायाः भूमिकां प्राशंसत् नवदिल्ल्याम् आयोजिते अष्टत्रिंशे इंटेलिजेंस ब्यूरो-विभागस्य शताब्दी-अक्षयनिधि-व्याख्यान-सत्रे उपस्थितान् जनान् संबोधयन्ती राष्ट्रपतिः द्रौपदी मुर्मु-वर्या प्रत्यपादयत् यत् इंटेलिजेंस ब्यूरो इति अभिकरणेन राष्ट्रिय-सुरक्षायाः निश्चप्रचं प्रबन्धने, भारतस्य एकतायाः अखण्डतायाः च रक्षणे अत्यन्तमेव महत्वपूर्णा भूमिका निर्व्यूढा अस्ति। अमुना प्रोदितं यत् विगते दशके आईबी इति अभिकरण-सदृशैः अभिकरणैः अनेकानि आन्तरिक-सङ्कटानि निष्क्रियीकृतानि सन्ति। राष्ट्रपतिना चारभिकरणविभागः देशस्य "अदृश्य-नायकत्वेन" प्रतिपाद्य तस्य समर्पणस्य सेवाभावस्य च प्रशंसा अपि विहिता। एतद् वक्तव्यं राष्ट्रिय-सुरक्षायां गुप्तचर-संस्थानां मौनं सशक्तं च योगदानम् स्पष्टतया रेखांकयति।

# PMGSY: चतुर्थे चरणे २९४ ग्रामाः सम्पर्कमार्गेण सम्बद्धाः भविष्यन्ति, लोकनिर्माणविभागेन केन्द्रसर्वकाराय प्रस्तावः प्रेषितः



हिमसंस्कृतवार्ताः - शिमला। हिमाचलप्रदेशे प्रधानमन्त्रिग्रामसड़कयोजनायाः चतुर्थे चरणे १४३८ किलोमीटर्पर्यन्तं मार्गनिर्माणं भविष्यति। एतेन राज्यस्य विभिन्नजनपदेषु २९४ ग्रामेषु मार्गसंपर्कः प्रदास्यते। एतेषु सर्वेषु ग्रामेषु २५० तः अधिका जनसंख्या अस्ति। लोकनिर्माणविभागेन एतेषां मार्गाणां डीपीआर-पत्राणि सज्जीकृत्य केन्द्रीयग्रामीणविकासमन्त्रालयाय अनुमोदनार्थं प्रदत्तानि। केन्द्रसर्वकारेण पीडब्ल्यूडी-प्रस्तावस्य अनुमोदनं कृत्वा अग्रे कार्यविधिः आरभ्यते। लोक निर्माणविभागस्य ईएनसी ई. एन.पी.सिंह सूचनानुसारं प्रधानमन्त्रिग्रामसड़कयोजनायाः चतुर्थचरणस्य आरम्भः आगामिवर्षे भवितुं निश्चितः अस्ति। लोकनिर्माणविभागात् प्राप्तसूचनानुसारं प्रधानमन्त्री ग्रामसड़कयोजनायाः चतुर्थे चरणे राज्यस्य १२ जनपदेषु कुलं १४३८ किलोमीटर् लम्बितानां कुल २९४ मार्गाणां निर्माणं भविष्यति। लोकनिर्माणविभागेन एतत्सम्बद्धाः प्रस्तावाः केन्द्रसर्वकाराय अनुमोदनार्थं प्रेषिताः। विभागस्य अनुसारं योजनायाः चतुर्थे चरणे शिमलामण्डले अधिकतमं मार्गं अर्थात् ९७ मार्गाः निर्मातुं प्रस्ताविताः सन्ति। तथैव कुल्लु-चम्बा-मण्डलयोः ६५-६५, बिलासपुरे चत्वारः, हमीरपुरे द्वौ, किन्नौरे अष्टौ, लाहौल-स्पीतौ द्वौ, मण्ड्यां २३, सिरमौरे ११, ऊनायां द्वौ सोलने त्रयः च मार्गाः निर्मास्यन्ते । विभागस्य अनुसारं चतुर्थे चरणे बिलासपुरे १९, चम्बायां २२८, हमीरपुरे सप्त, काङ्गड़ायां २३, किन्नौरे ६४, कुल्लौ ४०६, मण्ड्यां ११५, शिमलायां ४७४, सिरमौरे ५९, सोलननगरे अष्टौ ऊनायां च पञ्चकिलोमीटरदीर्घाः मार्गाः निर्मीयन्ते ।

## मुख्याभियन्ता किं वदति

लोकनिर्माणविभागस्य ईएनसी एन.पी. सिंहः अवदत् यत् १४३८ किलोमीटरदीर्घाणां मार्गाणां निर्माणार्थं २२७१ कोटिरूप्यकाणि प्रतिवेदनं सज्जीकृत्य, अनुमोदनार्थं केन्द्रसर्वकाराय प्रेषितमस्ति। प्रस्तावस्य अन्तर्गतं एते २९४ मार्गाः राज्यस्य विभिन्नेषु जनपदेषु २५० तः अधिकजनसंख्यायुक्तान् ग्रामान् सम्बद्धं करिष्यन्ति। प्रधानमन्त्रिग्रामसड़कयोजनायाः चतुर्थचरणं आगामिवर्षे आरभ्यते इति उक्तवान्। सः आशां कृतवान् यत् शीघ्रमेव मार्गप्रस्तावाः अनुमोदिताः भविष्यन्ति।

# काङ्ग्रेसेन हिमाचले कृतः राष्ट्रियप्रतिभान्वेषणकार्यक्रमस्य आरम्भः



हिमसंस्कृतवार्ताः - शिमला। काङ्ग्रेसप्रदेशाध्यक्षः विनयकुमारः मंगलवासरे शिमलानगरस्य मुख्यालये राजीवभवने दलस्य राष्ट्रियप्रतिभान्वेषणकार्यक्रमस्य औपचारिकरूपेण प्रारम्भं कृतवान्। अस्मिन् कार्यक्रमे राज्यस्य कृते दलप्रवक्तारः, वार्तासमूहस्य (मीडियापैनल) सदस्याः, शोधसमन्वयकाः, प्रचारसमन्वयकाः च चयनिताः भविष्यन्ति। अस्मिन् विषये दलेन राज्ये सर्वत्र योग्यानां, अनुभविनां, राजनैतिकदृष्ट्या जागरूकानां च युवानां आवेदनपत्राणि आमन्त्रितानि सन्ति। अस्मिन् अवसरे पत्रकारसम्मेलनं सम्बोधयन् कार्यक्रमस्य राष्ट्रियसंयोजकः हिमाचलप्रदेशस्य प्रभारी च चित्राबाथम अवदत् यत् केन्द्रे भाजपासर्वकारः सत्तायाः दुरुपयोगं कृत्वा संविधानस्य मौलिकसिद्धान्तानां उल्लङ्घनं कृत्वा लोकतन्त्रस्य दमनं करोति।अस्मिन् समये काङ्ग्रेस-पक्षेण व्यापकं राष्ट्रिय-अभियानं आरभ्यत इति निर्णयः कृतः, यस्य अन्तर्गतं सः प्रत्येकस्मिन् ग्रामे नगरे च मीडिया-माध्यमेन जनानां जागरूकतां जनयितुं प्रशिक्षितान् प्रवक्तॄन् नियुक्तं करिष्यति। चित्राबाथम इत्यनेन उक्तं यत् भारतं योजयतु यात्रातः भारतन्याययात्रापर्यन्तं मतदानचोर-गद्दीछोड़-अभियानपर्यन्तं विपक्षस्य नेता राहुलगान्धी इत्यनेन भाजपायाः यथार्थं चरित्रं राष्ट्रस्य समक्षं उजागरितम्। सः अवदत् यत् काङ्ग्रेसः कस्यापि परिस्थितौ देशस्य नागरिकेषु अन्यायं न सहते, न्यायस्य अस्मिन् युद्धे जनसमुदायस्य प्रत्यक्षसहभागितां सुनिश्चितं करिष्यति।

# हिमाचले कृषिक्रियाकलापाः वर्धन्ते, २६०० समूहाः निर्मिताः- मुख्यमंत्री सुक्खुः



हिमसंस्कृतवार्ताः- शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् राज्यसर्वकारेण हिम- उन्नतिः हिमकृषि योजनायाः अन्तर्गतं कृषिसम्बद्धानां कार्याणां कृते २६०० समूहाः निर्मिताः। अस्य अन्तर्गतं चम्बा, लाहौल-स्पीतिः, किन्नौर- जनपदेषु उच्च- उच्चक्षेत्रेषु हरिद्रा-केसर-कृषेः प्रचारः क्रियते। प्राकृतिककृषिद्वारा उत्पादितसस्यानां न्यूनतमसमर्थनमूल्यं निर्धारितं देशस्य प्रथमं राज्यं हिमाचलम् अभवत्। फलानां समर्थनमूल्ये अपि ऐतिहासिकवृद्धिः कृता। मंगलवासरे नूतनदिल्लीतः प्रत्यागत्य मुख्यमन्त्री उक्तवान् यत् कृषिः एव राज्यस्य जीवनरेखा एव अस्ति। राज्यस्य प्रायः ९० प्रतिशतं जनसंख्या ग्राम्यक्षेत्रेषु निवसति, प्रायः ५३.९५ प्रतिशतं च प्रत्यक्षतया कृषिसम्बद्धेषु कार्येषु निर्भराः सन्ति राज्यसर्वकारेण ९.६१ लक्षं कृषकपरिवाराणाम् प्राकृतिककृषिणा सह सम्बद्धीकरणस्य लक्ष्यं निर्धारितम् अस्ति। २,२२,८९३ कृषकाः उद्यानपालकाः च प्रायः ३८,४३७ हेक्टेयर क्षेत्रे प्राकृतिककृषिं पूर्णतया वा आंशिकरूपेण वा स्वीकृतवन्तः। १५ अप्रैल-दिनाङ्के राज्यसर्वकारेण चम्बानगरस्य आदिवासी- पाङ्गी- उपविभागः प्राकृतिककृषि- उपविभागः इति आधिकारिकतया घोषितः। गतवर्षे कृषकाणां कृते ३९९ मेट्रिकटन प्राकृतिकमक्कां क्रीतवान्, यस्य कृते ₹१ कोटिरूप्यकाणि तेषां वित्तकोषसंख्यासु स्थानान्तरितानि। अस्मिन् वर्षे नवम्बर्-मासस्य १४ दिनाङ्कात् अधुना यावत् कृषकाणां कृते १६१.०५ क्विण्टल-मक्का-क्रयणं कृतम् अस्ति । षट् जनपदेषु २,१२३ क्विण्टलगोधूमस्य क्रयणार्थं १.३२ कोटिरूप्यकाणि, १२७ क्विण्टलस्य कच्चा हरिद्रायाः कृते ₹११.४४ लक्षं च दत्तम् अस्ति। विपण्यमान्यतां सुदृढं कर्तुं प्राकृतिककृषि-उत्पादानाम् एकेन विशेषब्राण्डेन प्रक्षेपणं कृतम् अस्ति। गो-आश्रयस्थानानां उन्नयनार्थं प्रतिकृषकं ₹८,००० पर्यन्तं आर्थिकसहायता प्रदत्ता अस्ति। देशीजातीयगवानां क्रयणार्थं ₹२५,००० पर्यन्तम् अनुदानम् अपि प्रदत्तम् अस्ति।

# पूर्वपुलिसमहानिरीक्षकस्य सैयदजहूरहैदरजैदी इत्यस्य दण्डं पंजाब-हरियाणा-उच्चन्यायालयेन स्थगितम्

हिमाचलप्रदेशस्य कोटखाई-क्षेत्रस्य कुख्यातगुडिया-बलात्कारहत्याप्रकरणे अभियुक्तस्य आजीवनकारावासस्य दण्डं भुङ्क्तस्य पूर्वपुलिसमहानिरीक्षकस्य सैयदजहूरहैदरजैदी इत्यस्य दण्डं पंजाब-हरियाणा-उच्चन्यायालयेन स्थगितम्। श्रवणकाले रक्षापक्षस्य तर्कः आसीत् यत् जहूर हैदर जैदी हिरासतस्थले मृत्योः स्थले उपस्थितः नासीत्। उच्चन्यायालयस्य पीठिकायां उक्तं यत् जैदी पञ्चवर्षेभ्यः कारागारे अस्ति, याचनायाः श्रवणं दीर्घकालं यावत् भवितुं शक्नोति, अतः यावत् निर्णयस्य घोषणा न भवति तावत् तस्य दण्डः स्थगितः अस्ति। यतो हि अस्मिन् प्रकरणे सम्बद्धाः पुलिस-अधिकारिणः, कर्मचारिणः च हिमाचल-प्रदेशस्य सन्ति, अतः सर्वोच्चन्यायालयस्य आदेशस्य अनुसरणं कृत्वा चण्डीगढ-नगरस्य सीबीआई-न्यायालये एतत् श्रवणम् अभवत्, तस्य दण्डस्य विरुद्धं याचना च उच्चन्यायालये लम्बिता अस्ति। श्रवणानन्तरं न्यायाधीशः अनूप चितकारा इत्यस्य नेतृत्वे पीठिका जैदी इत्यस्य आजीवनं दण्डं स्थगितवती। ज्ञातव्यं यत् २०१७ तमे वर्षे चण्डीगढनगरस्य सीबीआई न्यायालयेन शिमलामण्डलस्य कोटखाईनगरे बहुप्रचारितगुडिया-बलात्कार- हत्याप्रकरणे अभियुक्तस्य सूरजस्य कारागारेहत्यायाः कृते पूर्वपुलिसमहानिरीक्षकजहूर-हैदरजैदीसहितानाम् अष्टपुलिसपदाधिकारिणां कर्मचारिणां च विरुद्धं दोषं कृत्वा आजीवनकारावासस्य दण्डः दत्तः।

# गीताश्लोकैः महामनः चरित्रेण च प्रतिध्वनितः डी. पी. एस. वाराणसी



**हिमसंस्कृतवार्ता-** महामनः पण्डितमदनमोहनमालवीयमहोदयस्य जयन्तीपर्वणि अवसरं दृष्ट्वा दिल्ली पब्लिक स्कूल, वाराणसी इत्यस्मिन् विद्यालये गीताज्ञान- प्रतियोगिता, भारतीय- संस्कृतिज्ञान- प्रतियोगिता, गीताश्लोक- गायनप्रतियोगिता इत्येतासां त्रयाणां प्रतियोगितानां भव्यम् आयोजनं कृतम्। अस्मिन् कार्यक्रमे विद्यालयस्य छात्राः महता उत्साहेन श्रद्धया च सक्रियतया भागं गृहीतवन्तः। कार्यक्रमे समन्वयिका सुनिपा सान्याल महोदया प्रतियोगितानां प्रशंसां कृत्वा महामनः मालवीयमहोदयस्य जीवनात् प्रेरणादायकान् प्रसङ्गान् निरूप्य छात्रान् तेषां जीवनमूल्यानि सेवा, राष्ट्रभक्ति, चरित्रनिर्माणं संस्काराश्च हृदये धारयितुं प्रेरितवती। विद्यालयस्य संस्कृताध्यापकः सदाशिव तिवारीमहोदयः भगवद्गीतायाः उपदेशान् चरित्रनिर्माणे व्यक्तित्वविकासे च अत्यन्तोपयोगिनः इति प्रतिपादयन् छात्रान् नियमित- गीता- अध्ययनाय प्रेरितवान्। सः अवदत् यत् विद्यालये प्रति सप्ताहं गीताश्लोक- अध्यापनस्य आरम्भः कृतः अस्ति। गीताजयन्ती (१ दिसम्बर) तथा महामनः जयन्ती (२५ दिसम्बर) इत्येतयोः पर्वयोः अवसरं दृष्ट्वा एताः प्रतियोगिताः "महामनः महोत्सव" इति नाम्ना नगरस्य विभिन्नेषु विद्यालयेषु आयोज्यन्ते। अस्य महोत्सवस्य मुख्यसंयोजकः अखिलेशकुमाररायमहोदयः (ओमानदेशस्य स्वास्थ्यमन्त्रालये Chief Pharmacist Officer, गीताज्ञानशिक्षकः) अवदत् यत् महामनः मालवीय- स्मृति- संस्कार- पुस्तकालयस्य अध्यक्षस्य, मालवीयमिशनस्य (बी. एच. यू. इकाई) उपाध्यक्षस्य, बी. एच. यू. विधिसंकायस्य प्राध्यापकस्य शैलेन्द्रकुमारगुप्ता महोदयस्य मार्गदर्शनेन, बी. एच. यू. सेवानिवृत्त- सहायक- कुलसचिवस्य डॉ. नरेशचन्द्र पाण्डेय महोदयस्य विशेष- सहयोगेन इदानीं यावत् १९ विद्यालयेषु एताः प्रतियोगिताः सम्पन्नाः, यत्र सहस्रशः छात्राः महता उत्साहेन भागं गृह्णन्ति। ते अवदन् यत् महामनः केवलं व्यक्तिनाम नास्ति, अपि तु भारतीय-संस्कृतेः गौरवं वहन्तः, गीता-सिद्धान्तान् जीवन्तः, राष्ट्रं सर्वोपरि मन्यमानः प्रातःस्मरणीयः महापुरुषः आसीत्। गीता- अध्ययनं, निःस्वार्थ-राष्ट्र-सेवा, स्व-संस्कृतेः जीवन्त-आचरणं च एव महामनः चरणेषु नमनम्। डी. पी. एस. वाराणसीस्य तेजस्विभिः छात्रैः प्रस्तुतं गीताश्लोकगायनं श्रुत्वा अखिलेश कुमार राय महोदयः अत्यन्तं प्रभावितः अभवत्। तेन स्वरचितं गीतम्-"बी. एच. यू. को बनाये महामना,ज्ञानस्य राजधानीं सजाये महामना,वयम् अपि भविष्यामः तस्य रत्नानि-एतदेव नमनम्" इति गीयमानं छात्रैः सह भाव-विभोरतया गायितम्।

***"महामनः की जय हो", "दिसम्बरः गीतामयः भवतु", "गीता सिद्धान्तः, महामनः दृष्टान्तः", "वयं गीता पठिष्यामः, अग्रे गमिष्यामः" इत्यादि उद्घोषैः सम्पूर्ण वातावरणं गुंजितम्।***

अस्मिन् अवसरे समाजसेविका विनिता देवहूति महोदया तथा आचार्या काकुली मुखर्जी महोदया अपि उपस्थिते स्तः। ताभ्यां नवीन-पीढ्याः संस्कार-निर्माणाय एषः प्रयासः अत्यन्तं महत्वपूर्णः इति अभिहितम्। विद्यालयस्य प्रधानाचार्या मुनमुन सेनगुप्ता महोदया,शैक्षणिकप्रमुखा रोली मानखण्ड महोदया,सह- शैक्षणिक- गतिविधिप्रमुखा काकुली मुखर्जी महोदया छात्रान् सम्बोध्य महामनः मालवीय- महोदयस्य राष्ट्रवादी-दृष्टिं शिक्षा-दर्शनं च विशदं कृतवत्यः।अस्मिन् अवसरे काकुली मुखर्जी, सुनिपा सान्याल अतिथीन् पुष्पगुच्छैः सम्मानितवन्त्यौ। कार्यक्रमे नीलू दीक्षित इत्यादयः शिक्षकाः अपि उपस्थिताः आसन्।एषः कार्यक्रमः छात्राणां मध्ये संस्कारबोधं, राष्ट्रप्रेम, आत्मविश्वासं, भारतीय- सांस्कृतिक- चेतनां च सुदृढीकर्तुं अत्यन्तं प्रेरणादायकः स्मरणीयश्च अभवत्।

# राष्ट्रपतिः द्रौपदीमुर्मूवर्या इंटेलिजेंस ब्यूरो- चारसंस्थायाः भूमिकां प्राशंसत्

**हिमसंस्कृतवार्ता, युवराजभट्टराई।** नवदिल्ल्याम् आयोजिते अष्टत्रिंशे इंटेलिजेंस ब्यूरो- चारविभागस्य शताब्दी- एंडोमेंट- व्याख्यानसत्रे संबोधयन्ती राष्ट्रपतिः द्रौपदीमुर्मूवर्या प्रत्यपादयत् यत् इंटेलिजेंस ब्यूरो- चाराभिकरणेन राष्ट्रियसुरक्षायाः सुनिश्चयीकरणे, भारतस्य एकतायाः अखण्डतायाः च रक्षणे अत्यन्तमेव महत्वपूर्णा भूमिका निर्व्यूढा अस्ति। अमुना प्रोदितं यत् विगते दशके IB इति चाराभिकरण-सदृशैः अभिकरणैः अनेकानि आन्तरिकसङ्कटानि निष्क्रियीकृतानि सन्ति। राष्ट्रपतिना चाराभिकरणविभागः देशस्य "अदृश्यनायकत्वेन" प्रतिपाद्य तस्य समर्पणस्य सेवाभावस्य च प्रशंसा अपि विहिता। एतद् वक्तव्यं राष्ट्रिय-सुरक्षायां गुप्तचरसंस्थानां मौनं सशक्तं च योगदानम् स्पष्टतया रेखांकयति।

# इन्फ्लुएंजा इति श्वसनरोगस्य निदानं सुदृढीकर्तुं विश्वस्वास्थ्यसङ्घस्य उपवेशनम्




**हिमसंस्कृतवार्ता, युवराजभट्टराई।** स्वास्थ्य-परिवार-कल्याण-मन्त्रालयस्य अन्तर्गतं राष्ट्रिय- रोग- नियन्त्रण- केन्द्रेण (NCDC) विश्वस्वास्थ्यसङ्घ- भारतस्य सहयोगेन देशे इन्फ्लुएंजारोगस्य निदानार्थं पूर्वसज्जतां सुदृढीकर्तुं नवदिल्ल्यां 22–23 दिसम्बरे द्वि-दिवसीयम् उपवेशनम् आयोजितम् अस्ति।"इन्फ्लुएंजा-निदानार्थं सज्जता-प्रतिक्रियाहेतोः अन्तरमन्त्रालयीय- अन्तरक्षेत्रीयसमन्वयः" इति विषये आयोजिते अस्मिन् चिन्तन-शिविरे निरीक्षणम्, प्रारम्भिकसञ्चेतना, प्रयोगशालासज्जता, चिकित्सकीया-सज्जता, जोखिम-सञ्चारश्च इत्येषु विशेषं बलं प्रदत्तम्।उद्घाटनसत्रे केन्द्रीयस्वास्थ्यमन्त्री जेपी नड्डा आभासीयमाध्यमेन अवदत् यत् आगामिनं इन्फ्लुएंजा ऋतुम् ध्यात्वा पूर्वसज्जतायाḥ प्रतिक्रियायाः च सुष्ठु-समन्वयः अत्यावश्यकः। सः IDSP माध्यमेन केन्द्र– राज्य- समन्वित- निरीक्षणस्य महत्वमपि रेखांकितवान्। अस्मिन् उपवेशने प्रायः 110 प्रतिनिधयः सहभागीभूताः। राज्याणां केन्द्रशासितप्रदेशानां च कृते व्यावहारिक- सज्जता- कार्यसूचिकायाः, समयेन सूचनाविनिमयस्य च विषयेषु विस्तृता चर्चा विहिता। एषः उपक्रमः वन-हेल्थ-दृष्टिकोणस्य अन्तर्गतं मानव– पशु– पर्यावरणीय- स्वास्थ्य- प्रणालीनां समन्वयं सुदृढीकर्तुं भारतस्य महामारीसज्जतां वैश्विकस्वास्थ्यसुरक्षां च सशक्तयति।

# बांग्लादेशे समेधमानां हिंसामभिलक्ष्य संयुक्तराष्ट्रस्य चिन्ता



**हिमसंस्कृतवार्ता, युवराजभट्टराई।** संयुक्तराष्ट्रमञ्चेन बांग्लादेशे विवर्धमानासु हिंस्रघटनासु गम्भीरा चिन्ता व्यक्तीकृता अस्ति। संयुक्त-राष्ट्र-महासचिवस्य एंटोनियो गुटेरेसस्य प्रवक्ता स्टेफन दुजारिकः न्यगादीत् यत् बांग्लादेशे निवसद्भ्यो समेभ्योऽपि जनेभ्यः, विशेषताश्च अल्पसंख्यकेभ्यः सुरक्षित- वातावरणस्य प्राप्तिः अत्यन्तमेव आवश्यकमस्ति अथ चैतत् कार्यं सर्वकारस्य दायित्वम् अस्ति। तत्रत्यान् अल्पसंख्यकान्, सविशेषं हैन्दव-जनान् विरुध्य सद्यो दुरापादितानां हिंस्रघटनानां विषये चिन्तां प्रकटयता प्रवक्त्रा प्रोक्तं यत् सर्वेषामपि नागरिकाणां निर्भयं जीवन यापनस्य अधिकारः अस्ति। अमुना मोहम्मद यूनुसस्य नेतृत्वयुते सर्वकारे विश्वासः प्रकाशितः यत् सः नागरिकाणां सुरक्षां सुनिश्चेतुं प्रयासान् करिष्यति।

उल्लेखनीयमस्ति यत् शरीफ उस्मान हादीत्यस्य मृत्योरनन्तरम् अल्पसंख्यकान् विरुध्य दुरापन्न हिंस्राचरणे वृद्धिः विलोकिता अस्ति। अनेन साकमेव, पूर्व-प्रधानमन्त्रिणः शेख हसीनायाः सर्वकारस्य पतनाद् अनन्तरं हिंस्रघटनाः वर्धिताः वर्तन्ते, याः खलु साम्प्रतिकेषु सप्ताहेषु गाम्भीर्यपूर्णाः जाताः सन्ति। संयुक्तराष्ट्र- मानवाधिकार- उच्चायुक्तेन शांतिसन्धारणार्थं, हिंस्राचरणं निषेधितुं, प्रतिशोधस्य भावानां शामयितुं च अध्यर्थना कृतास्ति। तत्रैव, अमेरिकीयैः सांसदैः अपि बांग्लादेशे हिन्दूजनान् सञ्चारमाध्यमान् च विरुध्य दुरापादितानां हिंस्रघटनानां भृशं भर्त्सना विहितास्ति सहैव निर्वाचनात्पूर्वं भयमुक्त- वातावरणस्य व्यवस्थापनमपि प्रोक्तम् अस्ति।

# एनटीपीसी बाल-भारती विद्यालये "वार्षिकोत्सवः 'आगाज़ 1.0 भारतम्—विरासतं वैभवं च '



**हिमसंस्कृतवार्ताः - सौरभः दे।** प्रतिवर्षवत् अस्मिन्नेव वर्षेऽपि बाल-भारती पब्लिक-विद्यालये, एनटीपीसी दर्लीपालीभूमौ दिसम्बरमासस्य २० तमे दिवसे वार्षिकोत्सवः 'आगाज़ 1.0 भारतः—विरासतं वैभवं च' इति नाम्ना महता हर्षोल्लासेन धूमधाम्ना च आयोजितः। अस्मिन् वार्षिकोत्सवे मुख्यातिथिरूपेण श्रीमान् फैज़ तैयब-महोदयः (हेड् ऑफ प्रोजेक्ट्, एनटीपीसी दर्लीपाली), विशिष्टातिथिरूपेण श्रीमती ताजीन जावेद-महाभागा (अध्यक्षा, अभिलाषा लेडीज़ क्लब), अन्ये च गणमान्यातिथयः—श्री रविन्द्र शर्मा (जी.एम. ओ एण्ड एम., एनटीपीसी दर्लीपाली), श्री राधेश्याम मौर्य (जी.एम. मेन्टेनेन्स् एवं एडमिन., एनटीपीसी दर्लीपाली), श्री संजीत कुमार मिंज (अतिरिक्तमहाप्रबन्धकः—मानवसंसाधनम्, एनटीपीसी दर्लीपाली), श्री नवीन अमिताभ बाकला (ए.जी.एम., मानवसंसाधनम्, एनटीपीसी दुलंगा), श्रीमती संगीता बाकला (मानवसंसाधनम्, एनटीपीसी दर्लीपाली), श्रीमती अपराजिता मिश्रा (सी.एम.ओ., निरामया चिकित्सालयः), श्री ललातेंदु मोहंती (डी.सी., सी.आई.एस.एफ.), श्रीमती शीरीन आरा (प्रधानाचार्या, ओ.ए.वी.एस. लेफरीपारा) इत्यादयः एनटीपीसी-सम्बद्धाः अधिकारीणः तथा सुन्दरगढ-जनपदस्य प्रमुखाः गणमान्यजनाः अतिथिरूपेण उपस्थिताः आसन्। विद्यालयस्य सम्माननीया प्रधानाचार्या श्रीमती उन्नती जोशी राऊत-महाभागा अतिथीन् पुष्पगुच्छैः शालैश्च सत्कार्य औपचारिकं स्वागतं कृतवती। वार्षिकोत्सवस्य शुभारम्भः प्रधानाचार्यायाः तथा मुख्यातिथेः करकमलाभ्यां दीपप्रज्वलनेन मंगलाचरण-नृत्येन च अभवत्। कार्यक्रमस्य संकल्पना अत्यन्तं रोचका आसीत्। अस्मिन् कार्यक्रमे एकस्य विदेशी-पर्यटकस्य भारत-भ्रमण-कल्पनां आधारीकृत्य देशस्य विविधराज्यानां वैशिष्ट्यानि संस्कृतयश्च प्रदर्शिताः। प्रत्येकस्य राज्यस्य प्रतिनिधित्वं तस्य विशिष्ट-नृत्यैः, वेशभूषाभिः, लोकसंस्कृत्या परम्पराभिश्च कृतम्। ततः आरब्धा सांस्कृतिक-यात्रा— केरलस्य लास्यम्, आन्ध्रप्रदेशस्य काललयः, कश्मीरस्य सौकुमार्यम्, गोवायाः उल्लासः, महाराष्ट्रस्य वीररसः, ओडिशायाः नृत्यनादः, पश्चिमबङ्गस्य भावगाम्भीर्यम्, मणिपुरस्य सौष्ठवम्, नागालैण्ड-मिज़ोरमयोः जनजातीय-वैचित्र्यम्, गुजरातस्य उत्साहः, राजस्थानस्य मरुगौरवम्, पञ्जाबस्य भाङ्ग्रानृत्ये आनन्दस्य महोत्सवः। एषा न केवलं नाट्यशाला, किन्तु भारतमाता स्वयं नृत्यन्तीव मञ्चे अवतरत्। "विविधतायां एकता" इति भावः शब्दातीतः अनुभूतः। विद्यार्थिभिः प्रस्तुताः लोकनृत्याः, शास्त्रीयनृत्यानि तथा सांस्कृतिक-झांक्यः भारतस्य 'एकता-मध्ये-वैविध्यं' इति भावनां सजीवां कृतवन्तः। कार्यक्रमकाले दर्शक-दीर्घा ताल-निनादैः गुञ्जिताभवत्। उपस्थितैः सर्वैः अतिथिभिः, अभिभावकैः तथा गणमान्यैः विद्यार्थिनां प्रतिभा, शिक्षकाणां कुशलमार्गदर्शनं तथा आयोजनस्य भव्यता मुक्तकण्ठेन प्रशंसिता। अस्मिन् वार्षिकोत्सवे विद्यालयेन गुणवत्तापूर्ण-शिक्षा, सांस्कृतिक-संरक्षणं, समानता, समावेशिता तथा सहभागिता इत्यादीन् संवर्धयन् सतत-विकास-लक्ष्यानां (SDG) प्रभावी-साधनं प्रदर्शितम्। सम्माननीया प्रधानाचार्या श्रीमती उन्नती जोशी राऊत-महाभागा विद्यालयस्य वार्षिक-प्रतिवेदनं प्रस्तुतवती, विद्यार्थिनां उज्ज्वल-भविष्यस्य कामनां कृत्वा सी.ई.एस. तथा एनटीपीसी-पदाधिकारिणां सहयोगाय धन्यवादं च अकार्षीत्।मुख्यातिथिना सांस्कृतिक-कार्यक्रमाः भूरि-भूरि प्रशंसिताः। सफलस्यास्य आयोजनस्य कृते विद्यार्थिभ्यः, शिक्षकभ्यः तथा आयोजन-समितये बधाईः प्रदत्ताः। ये च छात्राः शैक्षणिक-सत्रे 2024–25 मध्ये शैक्षणिकेषु सह-शैक्षणिकेषु च क्रियाकलापेषु उत्कृष्टं प्रदर्शनं कृतवन्तः, ते विशिष्ट-मेधावी-सम्मान तथा विशिष्ट-प्रतिभा-सम्मान इत्याभ्यां पुरस्कृताः।राष्ट्रगानेन सह वार्षिकोत्सवस्य समापनम्

## "लौकिकन्यायकोशः"

## "कुसूलधान्यन्यायः"

यथा धान्यस्य कुसूलः धान्येन पूर्णो भवति, किमपि एकम् अपरेण पूर्णम् अथवा व्याप्तम् इति वक्तुमस्य न्यायस्य प्रयोगो भवति। यथा- विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्। इत्यस्य गीतावाक्यस्य विवरणे नीलकण्ठाचार्यैः अस्य न्यायस्य प्रयोगः कृतः।

**डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**

## हास्यकणिका

गुरुः – "हे बालक! कथय, त्वं किं पठसि?"
शिष्यः – "गुरो, अहं गणितं पठामि।"
गुरुः – "साधु! कथय, यदि तव समीपे पञ्च आम्रफलानि सन्ति, चत्वारि त्वं खादसि, तर्हि कति शेषाणि?"
शिष्यः – "गुरो, शून्यम्!"
गुरुः – "कथं? एकं फलम् अपि शेषं नास्ति?"
शिष्यः – "गुरो, अहं तु सर्वाणि फलानि मित्रैः सह खादितवान्!"



**कृष्णप्रसादभरालीमहाभागः**

## श्रद्धाञ्जलिः

सतियामहाविद्यालयस्य संस्कृतप्राध्यापकस्य, विश्वनाथजिला-संस्कृतभारतीसमितेः प्राक्तन- मूलसचिवस्य डॉ. द्विपेनभराली-महोदयस्य पूज्यजनकः कृष्णप्रसादभरालीमहाभागः वैकुण्ठलोकं प्रति विगते ईं० 19/12/2025 दिनाङ्के इतः महाप्रस्थानम् अकरोदिति दुःखदवार्तेयम् अस्माभिः श्रूयते। अनया वार्तया विश्वनाथजिला-संस्कृतपरिवारः सद्यः अतीव शोकाकुलः, मर्माहतश्च वर्तते। प्रयात-महाभागः कश्चन वरिष्ठ-समाजसेवकः, जनप्रियः, सुचिन्तकः, आदर्शकृषकश्च आसीत्। स्वभार्या, चत्वारः सुपुत्राः, चतस्रः पुत्रवध्वः, अनेके पौत्रप्रपौत्रादयः, समस्ताः अभिजनाः चेति सर्वान् परित्यज्य अनन्तधाम प्रति प्रस्थितवान्। तस्य विदेह्यात्मनः भगवत्सन्निधौ चिरवासः, चिरशान्तिः च भूयादिति वयं सहृदयं कामयामहे, श्रीभगवन्तं च सश्रद्धं प्रार्थयामहे। तदर्थं दिवङ्गतात्मने अस्माभिः संस्कृतानुरागिभिः भावपूर्णाः नैके श्रद्धाञ्जलयः निवेद्यन्ते। विदेहिनः शोकसन्तप्तेभ्यः परिवारजनेभ्यः हृत्पूर्वकं समवेदनाः ज्ञाप्यन्ते इति। ॐ शान्तिः शान्तिः शान्तिः ।

**विश्वनाथः जिला- संस्कृतकुटुम्बः,**
**विश्वनाथ- चारिआलि, असमः**



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अहो, अद्यतनी प्रथमा वार्ता तु अतीव आल्हादकरी अस्ति। पृथिव्याः अदृश्यं प्रभामण्डलं ज्ञातुं नासा-संस्थया नूतनः उपक्रमः आरब्धः। एतेन वैज्ञानिकैः अस्माकं वायुमण्डलस्य रक्षणविषये संशोधनं कृतम्।

**नन्दिनी-** सत्यं वदसि, वायुमण्डलस्य रक्षणं तु अतीव आवश्यकम्। किन्तु पश्य, इदानीं मङ्गलग्रहात् अपि एका नूतना वार्ता प्राप्ता। मङ्गलस्य धूलि-चक्रवातेषु विद्युत्-स्फुलिङ्गाः वैज्ञानिकैः दृष्टाः। अनेन मङ्गलस्य वातावरणविषये अस्माकं पुरातनं ज्ञानं परिवर्तितम्।

**काव्या-** विस्मयकरः अयं मङ्गलवृत्तान्तः। वैज्ञानिकैः ब्रह्माण्डस्य रहस्यं ज्ञातवती अस्ति। अधुना स्वास्थ्य-क्षेत्रस्य वार्तां शृणु। भङ्गा-औषधेन (Cannabis) चिरकालीन-वेदनायाः निवारणम् अल्पकालं यावत् एव भवति इति संशोधकैः निश्चितम्।

**नन्दिनी-** आम्, औषधस्य मर्यादा तु सर्वदा ज्ञातव्या एव। अन्तिमा वार्ता अपि चिकित्सा-विज्ञानात् अस्ति। अपस्मार-रोगेण ग्रस्तानां मस्तिष्कात् जीर्णाः कोशिकाः वैज्ञानिकैः निष्कासिताः। एतेन अपस्मारस्य वेगाः न्यूनीकृताः।

**काव्या-** अहो, एषा तु महती उपलब्धिः। अनेन प्रयोगेण न केवलं रोगाः उपशान्ताः, अपितु रुग्णैः विस्मृताः स्मृतयः अपि पुनः प्राप्ताः। एवं विज्ञानेन नूतनः मार्गः अन्विष्टः। धन्यवादः।